पतये ॥ इतिमनसा ॥ ॐ इन्द्रायेति प्रजापति
ऋषिस्त्रिष्टुप्छन्द इन्द्रोदेवता आज्यहोमे वि-
नियोगः ॥ ॐ इन्द्राय स्वाहा ॥ इदमिन्द्राय ॥
इत्याघारौ ॥ अग्नय इति प्रजापतिर्ऋषिस्त्रि
ष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः ॥
ॐ अ ग्नये स्वाहा ॥ इदमग्नये ॥ प्रोक्षणी
पात्रेपि प्रक्षिपेत् ॥ ॐ सोमायेति प्रजापतिर्ऋ
षिस्त्रिष्टुप्छदः सोमो देवता आज्यहोमे वि
नियोगः ॥ ॐ सोमाय स्वाहा ॥ इदं सोमा-
य ॥ इत्याज्यभागौ प्रोक्षणीपात्रेपि प्रक्षि

पेत् ॥ महाव्याहृतीनाम्प्रजापति ऋषिरग्निवा
यूसुर्य्यादेवता गायत्र्युष्णिगनुष्टुप्छन्दांस्य-
ग्न्याधानेविनियोगः ॐ भूः स्वाहा ॥ इदम
ग्नये, प्रोक्षणीपात्रेपि प्रक्षिपेत् ॥ ॐ भुवः
स्वाहा ॥ इदं वायवे ॥ प्रोक्षणीपात्रेऽपि प्रक्षि-
पेत् ॥ ॐ स्वः स्वाहा ॥ इदं सूर्याय प्रोक्षणीपात्रे
पि० ॥ एतामहाव्याहृतयः ॐ त्वन्नोऽअग्न्य
इतिवामदेव ऋषिरग्नीवरुणौदेवते त्रिष्टुप्छन्द
आज्यहोमे विनियोगः ॥ ॐ त्वन्नोऽअग्नेव्वरु-
णस्यविद्वान्देवस्य हेडो ऽअवयासिसीष्ठाः ॥

यजिष्ठो वन्हितमः शोशुचानो व्विश्वाद्वेषो ꣳ
सिप्रमुमुग्ध्यस्म्मत्स्वाहा ॥ इदं अ नीवरुणा-
भ्यां प्रोक्षणीपात्रेपि प्रक्षिपेत् ॥७॥ ॐ सत्वन्नोऽ
अग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरु
णौदेवते आज्यहोमे विनियोगः ॥ ॐ सत्वन्नो
ऽअग्ने वमोभवोती नेदिष्टोऽअस्याऽउषसो व्व्यु
ष्टौ ॥ अवयक्ष्वनो व्वरुण ꣳ रराणो व्वीहि मृडी
कर्ठ० सुहवोन ऽएधि स्वाहा ॥ इदमग्निवरुणा
भ्याम् ॥ प्रोक्षणीपात्रेपि प्रक्षिपेत् ॥ ओंअयाश्वाग्न
इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवतासर्वप्राय

श्चित्तहोमे विनियोगः ॥ ओं अयाश्चाग्नेस्यनभि
शस्तिपाश्चसत्त्वमित्वमयाऽअसी ॥ अयानोय
ज्ञंवहा स्ययानोधेहिभेषजꣳ० स्वाहा ॥ इदमग्न
ये प्रोक्षणीपात्रेपि० ॥ ओं येतेशतमिति वामदेव
ऋषिस्त्रिष्टुप्छन्दो वरुणः सवितृविष्णुविश्व
देवमरुतः स्वर्क्कादेवताः प्रायश्चित्तहोमे विनियो
गः ॥ ओंयेतेशतं व्वरुणं येसहस्रंयाज्ञियाः पाशा
वितामहान्तः ॥ तेभिर्न्नोऽअद्यसवितोतविष्णु
र्व्विश्वेमुञ्चन्तुमरुतः स्वर्क्काः स्वाहा इदंवरुणा
य सवित्रे विष्णवे विश्वेभ्योदेवेभ्यः मरुद्भ्यः

स्वक्रुंभ्यः प्रोक्षणीपात्रेपि प्रक्षिपेत् ॥ ॐ उदुत्तम-
मितिशुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणोदेवता पा
शान्मोचने विनियोगः॥ आउँदुत्तमंवरुणपाशम-
स्मदवाधमं विमद्ध्य ँ श्रथाय ॥ अथावयमा-
दित्यव्व्रते तवानागसोऽअदितये स्याम स्वाहा ॥
इदं वरुणाय प्रोक्षणीपात्रेपि प्रक्षिपेत्॥ एताः प्राय
श्चित्तसंज्ञकाः ॥ इतिपञ्चवारुणिहोमः ॥ ❋ ॥ ❋

अथ प्रधानदेवताहोमसूत्राणि ॥ गणेशो भास्करो देवी
शिवो विष्णुश्च पञ्चमः ॥ पञ्चायतननामानः कथिताः पञ्च-
देवताः ॥१॥ विनायकस्तथादुर्गावायुराकाशएवच ॥ न सत्यदस्त्रौ

पंचैते लोकपालाः प्रकीर्तिताः ॥२॥ सूर्यः सोमश्च भौमश्च बुधो
जीवश्च भार्गवः ॥ शनीः राहुश्च केतुश्च कथितात्र नवग्रहाः॥३॥
ईश्वरश्च उमास्कन्दा विष्णुर्ब्रह्मा शचीपतिः ॥ यमः कालश्चित्रगुप्त
इत्येता अधिदेवता ॥ ४ ॥ अग्निरापोधराविष्णुरिन्द्र ऐन्द्री
प्रजापतिः ॥ सर्पा ब्रह्मा क्रमात्प्रोक्ता नव प्रत्यधिदेवताः ॥ ५ ॥
इन्द्राग्नीयमनिर्ऋती वरुणो मरुतो विधुः॥ ईशो ब्रह्मा तथानन्तो
दिक्पालाः परिकीर्त्तिताः ॥ ६ ॥ ध्रुवाद्यष्टवसुज्ञेया धात्रादित्या
स्तु द्वादश । वीरभद्राद्येकादश गौर्यादिमातृषोडश ॥ ७ ॥ आव
हादिमरुत्सप्त विनायक विधिर्हरिः ॥ रुद्रश्चार्कस्तथा प्रोक्तो वन-
स्पतिःक्रमेण हि ८ ॥ चतुःस्वति पयः पञ्च षड्विष्णुर्देवद्वादश ॥
शान्तिर्द्वादश षट्प्राषः षड्वातास्तु क्रमेणहि ॥ ९ ॥ अन
दुत्संज्ञको ज्ञेयो होमकर्मणि वैध्रुवम् ॥ पञ्च भगेन्द्रियाः पञ्चवरुणाः

पंच एवच ॥ १० ॥ गायत्रीचैव सावित्री वाग्देवो गृहमातृका ॥ अन्नपूर्णा महालक्ष्मीर्महारिष्टविनाशिनी ॥ ११ ॥ चण्डी द्यौरा ली विज्ञेया वास्तुभूम्यस्तथैवच ॥ गेडुश्च क्षेत्रपालश्च ग्रामदेवस्ततः परम् ॥ १२ ॥ स्वर्गेन्द्रो वासुकी चैव मित्रलोकस्तथैव च ॥ मान्धाता तीर्थराजश्च व्रतराजस्ततः परम् ॥ १३ ॥ पुर्नदिक्पालका ज्ञेयास्तिथिनक्षत्रयोगकाः ॥ वारश्च करणश्चैव वायुमेघसमुद्रकाः ॥ १४ ॥ नदीष्टकुलदेवाश्च स्थापितादेवताऽक्रमात् । भैरवो भैरवी विन्ध्यवासिनी स्थानदेवताः ॥ १५ ॥ एषोहसर्वदेवेतिशुक्रज्योतिस्तथैव च ॥ पाण्डवाः पितरश्चैव वैश्वानरः क्रमेण च ॥ १६ ॥ पूर्णपात्रं ततो दद्याद्धर्हिर्होमस्ततः परम् ॥ गोभूरत्नहिरण्यानि रौप्यवस्त्राणि चैवहि ॥ १७ ॥ देयानि द्विजमुख्येभ्यो यजमानो विशेषतः ॥ इतिहोम सूत्राणि ॥

अथ प्रधानदेवताहोमः ॥ ओं गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे व्व सोमम ॥ आहमजानि गर्ब्भधमा त्वमजासि ग र्ब्भधम् ॥ ओं गणपतये स्वाहा * इदंगणपतये

---

* यत्रमंत्रः स्वाहान्तोभवेत्तत्र स्वाहाशब्दो न प्रयोज्यः मंत्रेणैव देवता उक्तत्वात्पुनर्गणपतये स्वाहेति नोच्चारणीयं किन्तु स्वाहान्त मंत्रमुक्त्वा 'इदं गणपतयेनमम, इत्युच्चारःकर्तव्य इति याज्ञिकानां समाचारऽ एवमन्यत्रापि । मंत्रोच्चारणाभावे तु ओं गणपतये स्वाहेति वक्तव्यमेव ॥ यस्मिन्मन्त्रे न पठितःस्वाहाकारा भवेद्यदि। स्वाहान्तेन प्रयोक्तव्यो होमे च प्रणवादिकः॥ इति प्रयोगरत्ने ।

॥१॥ ओं आकृष्णेन रजसा वर्त्तमानो निवेशय
न्नमृतम्मर्त्यञ्च॥ हिरण्ययेन सविता रथेन देवो
याति भुवनानि पश्यन्॥ ओं सूर्याय स्वाहा॥ इ
दं सूर्याय॥२॥ ओं देवीर्द्वार ऽइन्द्रर्ठ० सङ्घाते
व्वीड्वीर्य्यामन्नवर्द्धयन्॥ आवत्सेन तरुणेन
कुमारेण च मीवता पार्व्वाण ꣳ रेणुककाटन्नुद
न्ताव्वसुवने वसुधेयस्य व्यंतु यज॥ ओं देव्यै
स्वाहा॥ इदं देव्यै॥३॥ ओंनमः शंभवाय च मयो
भवाय च नमः शङ्कराय, च मयस्क्कराय च। नमः
[illegible]स्य च शिवतराय च॥ ओं शिवाय स्वाहा॥

इदं शिवाय ॥ अत्र प्रणीतोदकस्पर्शः ॥४॥ ओं
विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो वि-
ष्णोः स्यूरसि व्विष्णोदृंध्रुवोसि ॥ वैष्णव
मसि विष्णवे त्वा ओं विष्णवे स्वाहा ॥
इदं विष्णव ॥५॥ इतिपाञ्चायनाः ॥ अथ पञ्च
लोकपालाः ॥ ओं गणानान्त्वा गणपति ठं०
हवामहे प्प्रियाणान्त्वा प्प्रियपतिठं० हवामहे
निधीनां त्वा निधिपति ꣳ हवामहे व्वसोमम ॥
आहमजानि गर्भधमा त्वमजासि गर्भधम् ।
ओं विनायकाय स्वाहा ॥ इदं विनायकाय ॥६॥

ओं अम्बेऽअम्बिकेम्बालिके नमानयति कश्च
न ॥ ससत्यश्श्वकः सुभद्रिकां काम्पीलवासि
नीम् ॥ ओं दुर्गायै स्वाहा ॥ इदं दुर्गायै ॥ ७ ॥
व्वायो येते सस्त्रिणो रथाशस्ते भिरागहि ॥
नियुत्वान्त्सोम पीतये ॥ ओं वायवे स्वाहा ॥
इदं वायवे ॥ ८ ॥ ओं ऊद्ध्वो ऽअस्य समि-
धो भवन्त्युद्ध्वा शुक्रा शोचीर्ठ० ष्यग्ने द्यु
मत्तमा सुप्रतीकस्य सुनोः ॥ ओं आकाशाय
स्वाहा ॥ इदंमाकाशाय ॥ ९ ॥ ओं आश्श्व

भैषज्येन तेजसे ब्रह्मवर्चसाय सिञ्चामि
सि सरस्वत्यै भैषज्येन वीर्यायान्नाद्याय सिञ्चामि

मि सरस्वत्यै भैषज्येन वीर्यान्नाद्या भिषिञ्चा
मीन्द्रायेन्द्रियेण बलाय श्रियै यशसे भिषि
ञ्चामि ॥ ओं अश्विनिकुमाराभ्यां स्वाहा ॥
इदमश्विनिकुमाराभ्याम् ॥ १० ॥ इति पञ्च
लोकपालाः ॥ अथनवग्रहाः ओं आकृष्णो-
न रजसा व्वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ॥
हिरण्ययेन सविता रथेन देवो याति भुवनानि
पश्यन् ॥ ओंसूर्यायस्वाहा ॥ इदं सूर्याय ॥ ११ ॥
ओं इमन्देवा ऽअसपत्न्कꣳ सुवध्वम्महते क्ष-
त्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्र

स्येन्द्रियाय ॥ इममुष्यपुत्रममुष्यै पुत्रमस्यै
विश ऽएषवोभी राजा सोमोस्माकम्ब्राह्मणा-
नार्ठ० राजा ॥ ओं सोमाय स्वाहा ॥ इदं सोमा
य ॥ १२ ॥ ओं आ निर्म्मूर्द्धा दिवः ककुत्पतिः
पृथिव्या ऽअयम् ॥ अपार्ठ० रेतार्ठ० सि जि
न्वति ॥ ओं भौमाय स्वाहा । इदं भौमाय ॥ १३ ॥
ओं उद्बुद्धयस्वाग्ने प्रतिजागृही त्वमिष्टापूर्तं
सर्ठ० सृजेथा मयञ्च ॥ अस्मि न्त्सधस्थे
ऽअद्ध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सी-
दत ॥ ओं बुधाय स्वाहा ॥ इदं बुधाय ॥ १४ ॥ ओं

बृहस्पतेऽअतियदर्य्यो ऽअर्हाद्द्युमद्विभातिक्रतु
मज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्प्रजातदस्म्मा
सुद्द्रविणन्धेहि चित्रम् उपयामगृहीतोसि
बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ॥ ओं
बृहस्पतये स्वाहा ॥ इदं बृहस्पतये ॥५५॥ ओं
अन्नात्परिश्रुतो रसम्ब्रह्मणा व्व्यपिबत्क्षत्रम्प
यः सोमम्प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं व्वि
पानर्ठ० शुक्रमन्धस ऽइन्द्रस्येन्द्रियमिदम्पयो
मृतम्मधु ॥ ओं शुक्राय स्वाहा ॥ इदं शुक्राय
॥१६॥शन्नोदेवी रभिष्टय ऽआपी भवन्तु पीतये॥

शंय्यो रभिस्रवन्तु नः ॥ ओंशनैश्चराय स्वाहा
इदं शनैश्चराय ॥१७॥ ओं कयानश्चित्र। ऽआ-
भुवदुती सदावृधः सखा ॥ कया शचिष्ठया वृता।
ओं राहवे स्वाहा ॥ इदं राहवे॥१८॥ ओं केतुङ्कृ
ण्वन्नकेतवे पेशो मय्यृाऽअपेशसे ॥ समुषद्भि
रजायथाः॥ओं केतवे॥स्वाहा॥इदं केतवे ॥१९॥
इतिनवग्रहाः॥अथाऽधिदेवताः ॥ ओं त्र्यंबकं य्य
ऽामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिव ब-
न्धनान्मृत्योर्म्मृक्षीय मामुतात् । त्र्यम्बकं य्य
ऽामहे सुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिव बं-

नादितोमुक्तीय मामुतः ॥ ॐ ईश्वराय स्वाहा॥
इदमीश्वराय ॥ अत्र प्रणीतोदकस्पर्शः ॥२०॥
ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे
नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषा
णा मुम्म ऽइषाण सर्व्वलोकम्म ऽइषाण ॥ ॐ
उमायै स्वाहा॥ इदमुमायै ॥२१॥ ॐ यदक्रन्दः
प्रथमञ्जायमान ऽउद्यन्त्समुद्रादुतवा पुरीषात् ॥
श्येनस्यपक्षा हरिणस्यबाहू ऽउपस्तुत्यम्महि
जातन्ते ऽअर्व्वन् ॥ ॐस्कंदाय स्वाहा ॥ इदं
स्कन्दाय ॥२२॥ ॐ विष्णो रराटमसि विष्णोः

श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णो ध्रुवोसि ॥ व्वैष्णावमसि विष्णवे त्वा ॥ ॐ विष्णवे स्वाहा ॥ इदं विष्णवे ॥ २३ ॥ ॐ ब्रह्म यज्ञानं प्रथमम्पुरस्ताद्विशीमतः सुरुचो व्वेन ऽआ-वः ॥ सबुद्ध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः ॥ ॐ ब्रह्मणे स्वाहा ॥ इदं ब्रह्मणे ॥ २४ ॥ ॐ त्रातारमिन्द्रमवितार मिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वया मिशक्रं पुरुहूतमिन्द्र ꣳस्वस्तिनो मघवा धा त्विन्द्रः ॥ ॐ इन्द्राय स्वाहा ॥ इदमिन्द्राय ॥ २५ ॥

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ॥
देवस्त्वा सविता मध्वानक्तु पृथिव्या सꣳ०
स्पृसस्पाहि ॥ अर्चिरसि शोचिरसि तपोसि ॥
ॐयमाय स्वाहा ॥ इदं यमाय ॥ अत्र प्रणी-
तोदकस्पर्शः* ॥२६॥ ओं कार्षिरसि समुद्रस्य
त्वा क्षित्या ऽउन्नयामि॥ समापो ऽअद्भिरग्मत
समोषधीभिरोषधीः ॥ ओं कालाय स्वाहा ॥
इदं कालाय ॥ अत्र प्रणीतोदकस्पर्शः ॥२७॥

---

* रौद्रन्तु राक्षसंपित्र्य-मासुर चाभिचारिकम् ।
उक्त्वामन्त्र स्पृशेदाप आलभ्यात्मानमेवच इति कर्मप्रदीपे॥

ओं इन्धानास्त्वा शतर्ठ० हिमा द्युमन्तर्ठ० समिधीमहि ॥ व्वयस्वन्तो व्वयस्कृतर्ठ० सहस्वन्तः सहस्कृतम् ॥ अग्ग्ने सपत्न्कदम्भनमदब्ब्धासो ऽअदाब्भ्यम् ॥ चित्रावसोः स्वस्ति ते पारमशीय ॥ ओं चित्रगुप्ताय स्वाहा ॥ इदं चित्रगुप्ताय ॥ अत्र प्रणीतोदक स्पर्शः ॥ ॥२८॥ इत्यधि देवता ॥ अथप्रत्यधिदेवताः ॥ ओं अग्निन्दूतम्पूरो दधे हव्व्यवाहमुपब्रुवे॥ देवाँ॥ऽआसादयादिह॥ओंअ नये स्वाहा॥इदमग्नयो २९ ओं अप्स्वग्ग्ने सधिष्ट्टवसौषधीरनुरुद्ध्य

स। गन्मे सञ्जायसे पुनः॥ ओं अद्भ्यःस्वाहा॥
इदमद्भ्यः॥३०॥ ओं स्योनापृथिवि नो भवान्नृ
क्षरा निवेशनी॥ यच्छानः शर्म्म सप्रथाः॥
ओं भूम्यै स्वाहा इदं भूम्यै॥३१॥ ओं इदं
विष्णु र्विचक्रमे त्रेधा निदधे पदम्॥ समूढमस्य
पा ँसुरे स्वाहा॥ ओं विष्णवे स्वाहा॥
इदं विष्णवे॥३२॥ ओं सजोषा ऽइन्द्रः
सगणो मरुद्भिः सोमम्पिव बृत्रहा शूरविद्धा॥ जहिशत्रुँ रपमृधो नुदस्वाहाभयङ्कृणुहि
विश्वतो नः॥ उपयामगृहीतोसीन्द्राय त्वा

मरुत्वत ऽएषते योनिरिन्द्राय त्वा मरुत्वते ॥ ओंइन्द्राय स्वाहा ॥इदमिन्दाय ॥३३॥ ओं आदित्यै रास्नासीन्द्राण्या ऽउष्णीषः॥ पूषासि घर्म्माय दीष्ट्व ॥ ओं इन्द्राण्यैस्वाहा ॥ इदमिन्द्राण्यै ॥३४॥ ओं प्रजापतेन त्वदेतान्न्यन्न्यो व्विश्श्वा रूपाणि परिता व्बभूव ॥ यत्कामास्ते जुहुमस्तन्नो ऽअस्तु व्वयर्ठ० स्याम पतयोरयीणा र्ठ० स्वाहा ॥ ओं प्रजापतये स्वाहा ॥ इदंप्रजापतये ॥३५॥ ओं नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ॥ ये ऽअन्तरिक्षे

ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ ओं सर्पे
भ्यः स्वाहा ॥ इदं सर्पेभ्यः ॥ ३६ ॥ ओं ब्रह्म
जज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो व्वेन
ऽआवः । सबुध्न्या ऽउपमा ऽअस्य व्विष्ठाः सत
श्च योनिमसतश्च व्विवः ॥ ओं ब्रह्मणे
स्वाहा इदं ब्रह्मणे ॥३७॥ ओं त्रातारमिन्द्रमवि
तारमिन्द्रꣳ० हवे हवे सुहवꣳ० शूरमिन्द्रम् ॥
ह्वयामि शक्रम्पुरुहूतमिन्द्र ꣳ स्वस्ति नो मघ
वा धात्विन्द्रः ओं इन्द्राय स्वाहा इदमि-
न्द्राय ॥ ३८॥ ओं अग्निन्दूतम्पुरो दधे हव्य

वाहमुपब्रुवे ॥ देवा २॥ ऽआसादया दिह ॥ ओं अग्नये स्वहा ॥ इदमग्नये ॥ ३९ ॥ ओं यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे। देवस्त्वा सवितामध्वानवतु पृथिव्याः सꣳ स्पृशस्पा हि ॥ अर्चिरसि शोचिरसि तपोसि ॥ ओं यमाय स्वहा॥ इदं यमाय ॥ अत्रप्रणीतोदकस्पर्शः।४०। ओं असुन्नन्तमयजमानमिच्छ स्तेनस्येत्या मन्विहि तस्करस्य ॥ अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ओं निर्ऋतयेस्वाहा ॥ इदं निर्ऋतये ॥ अत्र प्रणीतो

५२

 ओंव्वरुणास्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनी स्थो व्वरुणस्य ऽऋतसदन्यसि व्वरुणस्य ऽऋतसदनमसि व्वरुणस्य ऽऋतसदनमासीद ॥ ओं वरुणाय स्वाहा ॥ इदं वरुणाय ॥ ४२ ॥ ओं व्वायो येतेसहस्त्रिणो रथासस्ये भिरागहि ॥ नियुत्वात्सोम पीतये ॥ ओं वायवे स्वाहा ॥ इदं वायवे ॥ ४३ ॥ ओं सोमो धेनु ँसोमो ऽअर्व्वन्तमाशुँ० सोमो व्वीरङ्कर्म्मण्यन्ददाति। सादन्यं व्विदत्थ्यर्थ० सभेयम्पितृश्श्रवणं य्यो

ददाशस्मै ॥ ओंसोमाय स्वाहा इदं सोमाय ॥ ४४ ॥ ओं तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे व्वयम् ॥ पूषा नो यथा व्वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ओं ईशानाय स्वाहा ॥ इदमाशीनाय ॥ अत्रप्राणोदक स्पर्शः ॥ ४५ ॥ ओं ब्रह्म यज्ञानम्प्रथमम्पुरस्ताद्विशीमतः सुरुचो व्वेन ऽआवः ॥ सबुध्न्या ऽउपमा ऽअस्यव्विष्ठाः शतञ्च योनिमशतञ्च व्विवः ॥ ओं ब्रह्मणे स्वाहा इदं ब्रह्मणे ॥ ४६ ॥ ओं सहस्रशीर्षापुरुषः सहस्राक्षः सह-

...सहस्राक्षः सह-
स्रपात् सभूमिꣳ० सव्वतस्प्पृत्वात्यतिष्ठद्दशा
ङ्गुलम्॥ ओं अनन्ताय स्वाहा॥ इदमनन्ताय
॥४७॥ इति दिक्पालाः ॥ अथाऽष्टवसवः ॥
ओं सुगा वो देवाः सदनाऽ अकर्मय ऽआजिग्मे-
दꣳ० सवनञ्जुषाणाः ॥ भरमाणा व्वहमाना
हवीꣳ० ष्यस्मे धत्त व्वसवो व्वसूनी स्वाहा॥ ओं
ध्रुवाद्यय्टवसुभ्यः स्वाहा ॥ इदं ध्रुवाद्यष्टवसुभ्यः
॥५५॥ अथद्वादशादित्याः॥ ओंयज्ञो देवानाम्प्र
त्येति सुम्म्नमादित्यासो ॥ भवता मृडयन्तः ॥
आ वोर्व्वाची सुमतिर्व्ववृत्यादꣳ० होश्चिद्या

व्वरिवोवित्तरासदादित्येभ्य स्त्वा । ओं धात्रा
दिद्वादशादित्येभ्यः स्वाहा ॥ इदं धात्रादिद्वाद-
शादित्यभ्यः ॥ ६७ ॥ अथैकादक्षरुद्राः ॥ ओं य
एतावन्तश्च भूयाठ० सश्च दिशो रुद्रा विवतस्थि-
रे ॥ तेषाठ० सहस्रयोजने वधन्वानि तन्मसि ।
ओंवीरभद्राद्येकादरुद्रेभ्यः स्वाहा ॥ इदं वीरभ
द्राद्येकादशरुद्रेभ्यः ॥ अत्र प्रणीतोदकस्पर्शः
॥ ७८ ॥ अथषोडशमातरः ओं गौरीमिमा
सलिलप्सि तक्षत्येकपदी द्विपदी त्रिपदी सा
चतुष्पदी ॥ अष्टापदी नवपदी बभूविषि सहस्रा

...तु ... ॥ अष्टापदी नवपदी वभूवुषि सहस्रा
क्षरा परमे व्व्योमन् ॥ ओं गौर्यादिषोडषमातृभ्यः
स्वाहा । इदं गौर्य्यादिषोडशमातृभ्यः ॥ ९४ ॥
अथसप्तमरुतः ॥ ओं मरुतो यस्यहि क्षये
पाथदिवो व्विमहसः ॥ स सुगोपातमो जनः ॥
ओं आवाहादिसप्तमरुद्भ्यः स्वाहा ॥ इदमा
वाहादि सप्तमरुद्भ्यः ॥१०१॥ अथविनायका
दिष्ट ॥ ओंगणानान्त्वा गणपतिꣳ हवामहे
प्प्रियाणान्त्वा प्प्रिपतिꣳ हवामहे निधीना-
न्त्वा निधिपतिꣳ हवामहे व्वसोमम ॥ आहम-
जानि गब्भर्धमा त्वमजासि गब्भर्धम् ॥ ओंवि-

नायकाय स्वाहा ॥ इदं विनाकाय ॥१०२॥ ओं ब्रह्म यज्ञानम्प्रथम्पुरस्ताद्द्विशीमतः सुरुचो व्वेनऽआवः ॥ सबुन्ध्याऽउपमाऽअस्य व्विष्ठाः शतश्च योनिमःशतश्च व्विवः ॥ ओं ब्रह्मणे स्वाहा॥ इदं ब्रह्मणे ॥१०३॥ ओंव्विष्णोरराटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि विष्णोर्द्ध्रुवोसि व्वैष्णवमसि व्विष्णवे त्वा ॥ ओं विष्णवे स्वाहा ॥ इदं विष्णवे १०४ ओं मा नस्तोके तनये मा न ऽआयुषि मा नो गोषु मा नो ऽअश्वेषु रीरिषः ॥ मा नो व्वीरान् रुद्र

भामिनो व्वधीर्हविष्म्मन्तः सदामित्वा हवामहे ॥
ओं रुद्राय स्वाहा । इदं रुद्राय ॥ अत्र
प्रणीतोदकस्पर्शः ॥ १५ ॥ ओं अग्निरश्मिज
न्न्मना जातवेदा घृतम्मे चक्षुरमृतम्म ऽआ
सन् ॥ अर्क्कस्त्रिधातू रजसो व्विमानोजस्त्रो
घर्मो हविरस्मि नाम ओं अर्काय स्वाहा ।
इदमर्काय ॥ १०६ ॥ ओं वनस्पते वीड्वङ्गो हि
भूयाऽअस्म्मत्सखा प्प्रतरणः सुवीरः ॥ गोभि
सन्नद्धो ऽअसिव्वीडयस्वास्त्थाता ते जयतु जे
त्वानि ॥ ओं वनस्पतये स्वाहा ॥ इदं वनस्प-

तये ॥ १०७॥ अत्र विशेषोद्देश्याऽभिमतं कर्म कृत्वा तत्पश्चदेतदुत्तरं कर्म कुर्वन्ति ॥

इति श्रीटीकाराम धनञ्जय संशोधितायामग्नि-
स्थापनायां पूर्वार्द्धं समाप्तम् ❀ ॥

अथ चतुःस्वस्त्यादेयः ॥

ओं स्वास्ति न ऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो ऽअरिष्टनेमिः ऽस्वस्तिनो बृहस्पतिर्द्दधातु ॥ ओं चतुस्वस्तिभ्यः स्वाहा ॥ इदं चतुस्वस्तिभ्यः ॥१॥ॐ पयः पृथिव्व्यां पयऽओषधीषुपयो दिव्यन्तरिक्षे पयोधाः॥ पयस्वतीः प्रदिशः सन्तु मह्यम्॥ॐ पयःपञ्चभ्यःस्वाहा॥इदं पयः पञ्चभ्यः२ व्विष्णोरराटमसिव्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि व्विष्णोर्द्ध्रुवोसि ॥ व्वैष्णव

वमासि व्विष्णवे त्वा ॥ ॐ षड्विष्णुभ्यः स्वा
हा ॥ इदंषड्विष्णुभ्यः ॥३॥ ॐ अग्निर्द्देवता
व्वातो देवता सूय्यर्ो देवता चंद्रमा देवता व्वस
वो देवता रुद्रो देवताऽऽदित्या देवता मरुतो देव
ता व्विश्वेदेवा देवता बृहस्प्पतिर्द्देवतेन्द्रो देव
ता व्वरुणो देवता ॥ ओं द्वादशदेवेभ्यः स्वा
हा ॥ इदं द्वादशदेवेभ्यः ॥४॥ ओं द्यौः शांति
रन्तरिक्षꣳ शान्तिः ॥ पृथिवी शान्तिरापः शा
न्ति रोषध्धयः शान्तिः ॥ व्वनस्पतयः शांतिर्व्विव
श्वेदेवाः शान्तिर्ब्बह्मशान्तिः सर्व्वꣳ शान्तिः

शान्तिरवशान्तिः सोमा शान्तिरधि ॥ ओं द्वाद
शशान्तिभ्यः स्वाहा ॥ इदं द्वादशशान्तिभ्यः
॥ ५ ॥ ओं प्रातरग्निम्प्रातरिन्द्रꣳ हवामहे
प्रातर्म्मित्रावरुणा प्रातरश्विना ॥ प्रातर्भ
गम्पूषणम्ब्रह्मणस्पतिम्प्रातः सोममुत रुद्र
ꣳ हुवेम ॥ ओंषट्प्रातर्भ्यः स्वाहा ॥ इदं षट्
प्रातर्भ्यः ॥ ६ ॥ ओंसमुद्राय त्वा वातायं
स्वाहा शरीराय त्वा वातायं स्वाहाऽनाधृ
ष्याय त्वा वातायं स्वाहा प्रतिधृष्याय त्वा
वातायं स्वाहाऽवस्यवे त्वा वाताय स्वाहा

शिमिदाय त्वा व्वाताय स्वाहा ॥ ओंषड्वातेभ्यः स्वाहा ॥ इदं षड्वातेभ्यः ॥ ७ ॥ ओं अनड्वान्व्वयः पङ्क्तिश्छन्दो धेनुर्व्वयो जगतीच्छन्दस्त्र्यविर्व्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छन्दः पञ्चाविर्व्वयो गायत्रीछन्दस्त्रिवत्सो व्वय ऽउष्णिक्छन्दस्तुर्य्यवाड्वयोनुष्टुप्छन्दो लोकन्ताऽइंद्रम् ॥ ओं त्र्यनडुद्भ्यः स्वाहा इदं त्र्यनडुद्भ्यः ॥ ८ ॥ ओं भग ऽएव भगवां २ ॥ अस्तुदेवा स्तेनव्वयम्भगवन्तः स्याम ॥ तं त्वभग सर्व्व ऽईज्जोहवीति स नो भग पुर ऽएता

भवेह ॥ ओंपञ्चभगेभ्यः स्वाहा ॥ इदं पञ्च
भगेभ्यः ॥ ९ ॥ ओंप्राणाय स्वाहा पानाय
स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय
स्वाहा वाचे स्वाहा मनसे स्वाहाः ॥ ओं
पञ्चेन्द्रियभ्यः स्वाहा ॥ इदं पंचेन्द्रियभ्य
॥ १० ॥ ओं वरुणस्योत्तम्भनमसि वरुणस्य
स्कम्भसर्ज्जनी स्थो वरुणस्य ऽऋतसद-
न्यसि वरुणस्य ऽऋतसदनमसि वरुणस्य
ऽऋतसदनमासीद ॥ ॐ पंचवरुणेभ्यः स्वाहा ॥
इदं पंचवरुणेभ्यः ॥ ११ ॥ ओं गायत्री त्रिष्टु-

प्जगत्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्युष्णिहा
ककुप्सूचीभिः शम्म्यन्तुत्वा। ओं गायत्र्यै स्वा-
हा॥ इदं गायत्र्यै ॥ १२॥ ओं उपयामगृहीतो
सि सावित्रो सि च नोधाश्च नो धा ऽआसि
चनो मयि धेहि ॥ जिन्व यज्ञञ्जिन्व यज्ञपतिं
भगाय देवाय त्वा सवित्रे ॥ ओं सावित्र्यै
स्वाहा॥ इदं सावित्र्यै ॥ १३॥ ओं सरस्व-
ती योन्न्याङ्गर्भमन्तरश्विभ्याम्पत्नी सु-
कृतं बिभर्ति ॥ अपाठ० रसेन व्वरुणो न सा
म्नेन्द्रर्ठ० श्रियै जनय न्नप्सु राजा ॥ ओं

सरस्वत्यै स्वाहा ॥ इदं सरस्वत्यै ॥ १४ ॥ ओं गृहा मा विभीत मा वेपद्ध्वमूर्ज्जम्बिभ्रत ऽएमासि ॥ ऊर्ज्जम्बिभ्रद्द्वः सुमना सुमेधा गृहानाऽमि मनसा मोदमानः ॥ ओं गृहमात्रे स्वाहा ॥ इदं गृहमात्रे ॥ १५ ॥ ओं अन्न पतेन्नस्यनो देह्यनमीवस्य शुष्मिणः ॥ प्रप्रदातारन्तारिष ऽऊर्ज्जन्नो धेहि द्विपदे चतुष्पदे ॥ ओं अन्नपूर्णायै स्वाहा ॥ इदमन्नपूर्णायै ॥ १६ ॥ ओं श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वेनक्षत्राणि रूप

माश्विनौ व्व्यात्तम् । इष्णन्निषाणा मुम्म ऽइषाण सर्व्वलोकम्म ऽइषाण ॥ ओं महाल-
क्ष्म्यै स्वाहा ॥ इदं महालक्ष्म्यै ॥ १७ ॥ ओं देवी
द्वार ऽइन्द्रर्ठ० सङ्घाते व्वीड्वीर्य्यामन्न वर्द्ध-
यन् ॥ आवत्सेन तरुणेन कुमारेण च मीवता
पार्वाणर्ठ० रेणुककाटन्नुदन्तां व्वसुवने व्वसुधे
यस्य व्व्यन्तु यज ॥ ओं महारिष्टविनाशिन्यै
स्वाहा ॥ इदं महारिष्टविनाशिन्यै ॥ १८ ॥ ओं
अम्बे ऽअम्बिकेम्बालिके नमानयति कश्चन ॥
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिन्यै-

म् ॥ ओं चण्डयै स्वाहा ॥ इदं चण्डयै ॥१९॥
ॐ घोरासीत्पूर्व्वचित्तिरश्व ऽआसीद्बृहद्ध
यः ॥ अविरासीत्पिलिप्पिला रात्रिरासीत्पि
शङ्गिला ॥ ओं घौरात्यै स्वाहा ॥ इदं घौरात्यै
॥ २० ॥ ओंव्वसोः पवित्रमसि शतधारं व्वसोः
पवित्रमसि सहस्रधारम्॥देवस्त्वा सविता पुना
तु व्वसोःपवित्रेण शतधारेण सुप्वा कामधुक्षः॥
ओं वास्तुदेवाय स्वाहा ॥ इदं वास्तदेवाय॥२१॥
ओं भूम्म्याऽआखूनालभतेन्तरिक्षाय पाङ्क्ता
न् दिवेकशान् दिग्भ्यो नकुलान्व्वभ्रुकानवा

न्तरदिशाभ्यः ॥ ओंभूमिदेवाय स्वाहा । इदं भूमिदेवाय ॥ २२ ॥ ओं नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ ओं गैडुदेवाय स्वाहा ॥ इदं गैडुदेवाय ॥ २३ ॥ ओं क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि ॥ मा त्वा हिर्ठ० सीन्मा माहिर्ठ०सीः॥ओं क्षेत्रपालाय स्वाहा॥ इदं क्षेत्रपालाय ॥२४॥ ओं यदग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ॥ यदेनश्च कृमाव्वय मिदन्तदवयजामहे स्वाहा ॥ ओं ग्रामदेवाय

स्वाहा ॥ इदं ग्रामदेवाय ॥ २५ ॥ ओं त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवाधात्विन्द्रः ॥ ओं स्वर्गेन्द्राय स्वाहा । इदं स्वर्गेन्द्राय ॥ २६ ॥ ओं नमोस्तु सर्पेभ्यो ये के च पृथिवी मनु ॥ ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ ओंपातालवासुकये स्वाहा ॥ इदम्पातालवासुकिभ्यः ॥ २७ ॥ ओं मित्रोन ऽएहिसुमित्रध ऽइन्द्र स्योरुमाविश दक्षिणामुशन्नुशन्त ꣳ स्योनः

स्योनम् ॥ स्वान व्भ्राजाङ्घारे वम्भारे हस्त
सुहस्तकृशानवेते वः सोमक्रयणास्तान्रक्षद्ध्व
म्मावो दभन् ॥ ओं मित्र लोकाय स्वाहा ॥ इदं
मित्रलोकाय ॥ २८ ॥ ओं राजन्तमध्वरा
णाङ्गोपा मृतस्य दीदिविम् ॥ व्वर्द्धमानठ०
स्वेदमे ॥ मान्धात्रे स्वाहा ॥ इदं मांधात्रे ॥२९॥
ओंये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गे
णः ॥ तेषार्ठ० सहस्रयोजनेवधन्वानि तन्म
सि ॥ ॐ तीर्थराजाय स्वाहा ॥ इदं तीर्थराजाय
॥ ३० ॥ ओं व्रतेन दिक्षामाप्नोतिदीक्षयाप्नोति

दक्षिणाम् ॥ दक्षिणा श्रद्धामाप्नोति श्रद्ध
या सत्यमाप्यते ओं व्रतराजाय स्वाहा ॥
इदं व्रतराजाय ॥ ३१ ॥ ओं प्राच्यै दिशे
स्वाहार्व्वाच्यै दिशे स्वाहा दक्षिणायै दिशे
स्वाहार्व्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे
स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहा
वाच्यै दिशेस्वाहोर्ध्वायै दिशे स्वाहार्व्वा-
च्यै दिशे स्वाहार्वाच्यै दिशे स्वाहार्वाच्यै
दिशेस्वाहा ॥ ओं पुनर्दिक्पालेभ्य स्वाहा ॥
इदं पुनर्दिक्पालेभ्यः ॥ ३२ ॥ ओं अ-

ग्ने पत्नतिर्वायोर्नियत्नाति रिन्द्रस्य तृतीया सो
मस्य चतुर्थादित्यै पञ्चमीन्द्राण्यैषष्ठी मरुता
ठ० सप्तमी बृहस्पतेरष्टम्म्यर्य्यम्णो नवमी
धातुर्दशमीन्द्रस्यैकादशी ब्वरुणास्य द्वादशी
यमस्य त्रयोदशी ॥ ओं तिथिभ्यः स्वाहा ॥
इदं तिथिभ्यः ॥ ३३ ॥ ओंनक्षत्रेब्भ्यःस्वाहा
नक्षत्रियेभ्यः स्वाहा होरात्रेब्भ्यः स्वाहा र्द्ध
मासेब्भ्यः स्वाहा मासेभ्यः स्वाहा ऋतुब्भ्यः
स्वाहार्त्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्या
वापृथिवीब्भ्यार्ठ० स्वाहा चन्द्राय स्वाहा

सूर्य्याय स्वाहा रश्मिभ्य स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहा दितेभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यः देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ ओंनक्षत्रेभ्यः स्वाहा ॥ इदं नक्षत्रेभ्य ॥ ३४ ॥ ओं योगे योगे तवः स्तरं वाजे वाजे हवामहे ॥ सखाय ऽइन्द्र मूतये ॥ ओंयोगेभ्यः स्वाहा ॥ इदं योगेभ्यः ॥ ॥ ३५ ॥ ॐ आदित्यङ्गर्भम्पयसामङ्-

ग्धिसहस्रस्य प्रतिमां व्विश्श्वरूपम् ॥ परिवृङ्
ग्धि हरसा माभिमर्ठ० स्थाः शतायुषङ्कृणुहि
चीयमानः ॥ ओं वारेभ्यः स्वाहा ॥ इदं वारेभ्यः
॥ ३६ ॥ ओंभद्रं कर्णेभिः शृणुयाम देवा
भद्रम्पश्येमा क्षभिर्य्यजत्राः ॥ स्थिरैरङ्गै
स्तुष्टुवा ꣳ सस्तनूभि र्व्यशेमहि देवहितं
यदायुः ॥ ओं करणेभ्यः स्वाहा ॥ इदं
करणेभ्यः स्वाहा ॥ ३७ ॥ व्वायो ये ते स-
हस्रिणो रथासस्ते भिरागहि ॥ नियुत्वा-
न्त्सोम पीतये ॥ ओंवातेभ्यः स्वाहा

इदं वातेभ्यः ॥ ३८ ॥ ओंव्वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहास्फुर्ज्जते स्वाहा व्वर्षते स्वाहा वंवर्षतेस्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वहाप्रुष्वाभ्यः स्वाहा ह्रादिनीभ्यः स्वाहा नीहाराय स्वाहा ॥ ओंमेघेभ्यःस्वाहा॥इदं मेघेभ्यः ॥३९॥ ओंसमुद्रंगच्छ स्वाहान्तरिक्षङ्गच्छ स्वाहा देवठ० सवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा

होरात्रे गच्छ स्वाहा छन्दार्ठ० सि गच्छ स्वाहा
द्यावा पृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वा
हा सोमङ्गच्छ स्वाहा दिव्यन्नभो गच्छ स्वा
हाग्निं न्वैश्श्वानरङ्गच्छ स्वाहा मनो मे हार्दि
यच्छ दिवन्तेधूमो गच्छतु स्वर्ज्ज्योतिः पृथिवी-
म्भस्मना पृण स्वाहा ॥ ओंसमुद्रेभ्यः स्वाहा ।
इदं समुद्रेभ्यः ॥४०॥ ओं नदीभ्यः पौञ्जिष्ठ
मृत्तीकाभ्यो नैषादम्पुरुषव्याघ्राय दुर्म्मदं
गन्धर्व्वाप्सरोभ्यो व्रात्यम्प्रयुग्भ्य ऽउन्मत्तर्ठ०
सर्प्पदेवजनेभ्यो प्रतिपदमयेभ्यः कितवमार्य्यु

तायाऽअकितवं पिशाचेभ्यो विदलकारीं व्या
तुधानेभ्य; कण्टकीकारीम् ॥ ओं नदीभ्यः स्वा
हा ॥ इदं नदीभ्यः ॥४१॥ ओं इष्टो यज्ञो भृगुभि
राशीर्द्वा व्वसुभिः ॥ तस्य न ऽइष्टस्य प्रीतस्य
द्रविण हागमेः ॥ ओं दृष्टदेवाय स्वाहा ॥ इद
मिष्टदेवाय ॥ ४२ ॥ ओं कुलायिनी घृतवती
पुरन्धिः स्योने सीद सदने पृथिव्याः ॥ अभित्वा
रुद्द्रा व्वसवो गृणन्त्विमा ब्रह्मपिपिहि सौभगा
याश्विनाध्वर्य्यू सादयतामिह त्वा ॥ ओं कुल
देवाय स्वाहा इदं कुलदेवाय ॥४३॥ यत्रस्थापि

तो थो देवस्तत्तन्मन्त्रेण होमयेत् ॥ ओंनमः शम्भदाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ ओं भैरवाय स्वाहा ॥ इदं भैरवाय ॥४४॥ ओं देवीर्द्वार ऽइन्द्रर्ठ० सङ्घाते व्वीड्वीर्य्यामन्नवर्द्धयन् ॥ आवत्सेन तरुणेन कुमारेण च मीवता पार्व्वाणर्ठ० रेणुककाटन्नुदन्तां व्वसुवने व्वसुधेयस्य व्वयन्तु यज ॥ ओं भैरव्यै स्वाहा ॥ इदं भैरव्यै ॥ ४५ ॥ ओं अम्बेऽअम्बिकेम्बालिके नमानयति कश्चन ॥ ससस्त्यश्वकः सुभद्रिकां

का काम्पाल वासिनीम् ॥ ओं विन्ध्यवासिन्यै स्वाहा ॥ इदंविन्ध्यवासिन्यै ॥४६॥ यत्रस्थान विशेषऽधिष्ठितो या देवो देवी वा तत्तन्मन्त्रेण होमयेत् ॥ तत एषो ह देव इतिसर्वदेवम् ॥ ॐ एषो ह देवः प्रदिशो न सर्वाः पूर्व्वोह जातःसऽउगर्भेऽअन्तः ॥ सऽएवजातः सजनिष्यमाणःप्रत्यङ्जनास्तिष्ठति सर्व्वतो मुखः ॥ ओं सर्वेभ्यो देवेभ्यः स्वाहा ॥ इदं सर्वभ्यो देवेभ्यः ॥४७॥ शुक्रज्योतिरिति सर्वहोमपूरणार्थम् ॥ ओं शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योयिश्च

ज्योतिष्मांश्च शुक्रश्चऽऋतपाश्चात्यर्ठ०हा ॥ स्वाहा । इदं सर्व पूरणाय ॥ ४८ ॥ ओंराज न्तमद्ध्वराणाङ्गोपा मृतस्य दीदिविम् ॥ व-र्द्धमानर्ठ०स्वेदमे ॥ ओंपञ्चपाण्डवेभ्यः स्वा-हा ॥ इदं पञ्चपाण्डवेभ्य ॥ ४९ ॥ ॐ उग्र-श्च भीमश्च ध्वान्तश्च धुनिश्च ॥ सासह्वाँश्चा भियुग्वाच क्षिप्तिः ॥ ओं भीमसेनाय स्वा-हा ॥ इदं भीमसेनाय ॥ ५० ॥ ओं पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्व-धायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधा-

यिभ्यः स्वधा नमः ॥ अत्तान्पितरोमीमदन्त पितरोतीतृपन्तपितरः पितरः शुन्धध्वम् ॥ ॐ पितृभ्यः स्वाहा ॥ इदं पितृभ्यः । अत्रप्रणीतोदकस्पर्शः ॥ ॥५१॥ ततः कण्डिकात्रयेण वैश्वानरम् ॥ ओं ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् ॥ अजस्रदुःघर्मंमीमहे । उपयागृहीतोसि व्वैश्वानरायत्वैष त योनिर्वैश्वानराय त्वा ॥ ओं वैश्वानराय स्वाहा ॥ इदं वैश्वानराय ॥५२॥ ओं व्वैश्श्वानरस्य सुमतौ स्याम राजा हि कम्भुकवनानामभि श्श्रीः ॥

इतो जातो विश्वामिदं विचष्ट्टे वैश्वानरो
यतते सूर्य्येण ॥ उपयामगृहीतोसि वैश्वान
रायत्वैष ते योनिर्वैश्वानराय त्वा ॥ ओं वै
श्वानराय स्वाहा ॥ इदं वैश्वानराय ॥ ५३ ॥
ओं वैश्वानरोन ऽऊतय ऽआप्रयातु परावतः
अग्निरुक्थ्येन वाहसा ॥ उपयामगृहीतोसि
वैश्वानरायत्वैष ते योनिर्वैश्वानराय त्वा ॥
ओं वैश्वानराय स्वाहा ॥ इदं वैश्वानराय ॥
॥५४॥इति॥ ओं आकाशे यानि तीर्थानि या
नि तीर्थानि भूतले ॥ पाताल यानि तीर्थानि

सर्वतीर्थ नमोस्तु ते स्वाहा ॥ ५५ ॥ ओं आ-
काशे ये च देवाश्च ये देवाः सन्ति भूतले ॥
पाताले सन्ति ये देवाः सर्वदेव नमोस्तु ते
स्वाहा ॥५६॥ ॐ आकाश यानिलिंगानि यानि
लिंगानि भुतले ॥ पाताले यानि लिंगानि तानि
लिंग नमोस्तुते स्वाहा ॥ ५७ ॥ ततोमहाव्या-
हृतिहोमादि प्रजापतिहोमान्तमुत्तराङ्गहोमं
कुर्यात् ॥ तद्यथा ॥ ॐ महाव्याहृतीनाम्प्रजा
पतिर्ऋषिरग्निवायुसूर्य्या देवता गायत्र्युष्णि
गनुष्टुप्छन्दां स्यग्न्याधानेविनियोगः ॥ ॐ

भूः स्वाहा ॥ इदमग्नये प्रोक्षणीपात्रेपि० ॥ ओं स्वः स्वाहा इदं सूर्य्याय प्रोक्षणीपात्रेपि ॥ एतामहाव्याहृतयः ॥ ओं त्वन्नो ऽअग्न ऽइति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्द ऽआज्यहोमे विनियोगः ॥ ओं त्वंनो ऽअग्ने वरुणस्य व्विद्वान्देवस्य हेडो ऽअवया सि-सीष्ठाः ॥ यजिष्ठो व्वन्हितमः शोशुचानो व्विश्श्वाद्द्वेषाठ० सि प्रमुमुग्ध्यस्मत् ॥ ओं अग्नीवरुणाभ्यां स्वाहा ॥ इदमग्नीवरुणाभ्याम् ॥ प्रोक्षणीपात्रेऽपि ॥ ओं सत्वन्नो ऽअ-

ग्न इति वामदेव ऋषिस्त्रिष्टुप्यछन्दोऽग्नी वरुणौदेवते आज्यहोमे विनियोगः ॥ ओं सत्वन्नो ऽअ नेवमोभवोतीनेदिष्टो ऽअस्या ऽउषसोव्व्युष्टौ ॥ अवयक्ष्वनो व्वरुणर्ठ० ररणो व्वीहि मृडीकर्ठ० सुहवोन ऽएधि ॥ ओं अग्नी वरुणाभ्यां स्वाहा ॥ इदंमग्नीवरुणाभ्याम् ॥ प्रोक्षणीपात्रेपि ॥ ओं अयाश्चाग्न इति वाम देव ऋषिस्त्रिष्टुपछन्दो ऽग्निर्देवता सर्व्वप्राय श्चित्तहोमे विनियोगः ॥ ओं अयाश्चाग्नेस्यनभिशस्तिपाश्च्च सत्वमित्वमयाऽसि ॥

अयानो यज्ञंव्वहास्ययानो धेहि भेषजꣳ० स्वाहा ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये प्रोक्षणीपात्रेपि ॥ ॐ येतेशतमितिवामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणःसवितृविष्णुविश्वे-देवामरुत्स्वर्क्कादेवताः प्रायश्चित्तहोमे विनि-योगः ॥ ॐ येते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशाविता महान्तः ॥ तेभिन्नोऽअ द्यसवितोतद् द्विष्णुर्व्विश्श्वे मुञ्चन्तु मरुतः स्व र्क्काः स्वाहा ॥ ॐ वरुणाय सवित्रे विष्णवे विश्वे

भ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः प्रोक्षणीपात्रेपि ॥ ॐ उदुत्तममितिशुनः शेपऋषिस्त्रिष्टुप्छन्दो वरुणोदेवता पाशान्मोचन विनियोगः॥ ॐ उदुत्तमं व्वरुणपाशमस्म्मद्द्बाधमं विमध्यमर्ठ० श्रथाय ॥ अथाव्वयमादित्यव्व्रते तवानागसोऽअदितये स्याम ॥ ओं वरुणाय स्वाहा॥ इदंवरुणाय ॥ प्रोक्षणीपात्रेपि० ॥ एताः प्रायश्चित्तसंज्ञकाः ओं प्रजापतय इति प्रजापतिऋषि स्त्रिष्टुप्छंदः प्रजापतिर्देवत्ता आज्यहोमे

विनियोगः॥ ॐ प्रजापतये स्वाहा॥ इदंप्रजा-
पतये ॥ इति मनसा॥ ॐ अग्नयेस्विष्टकृते
स्वाहा॥ इदमग्नयेस्विष्टकृते॥ ततः संस्रवप्राश
नम्॥ ततोहोता। ॐ अद्येहेत्यादिकृतस्याऽमुक्
कर्मणः परिपूर्णतासिद्धयर्थं मृडनामानौ पूर्णा
हुतिंहोमायिष्ये इति संकल्प॥ मूर्द्धानन्दिव इति
घृतेन पूर्णाहुतिंजुहुयात् ॥ ओं मूर्द्धानन्दिवो
ऽअरतिम्पृथिव्या वैश्वानरमृत ऽआजातम-
ग्निम् ॥ कविंठ० सम्म्राजमतिथिञ्जनानाम्

सम्नापात्रं जनयन्तु देवाः स्वाहा ॥ इतिपूर्णा
हुतिः * ॥ ततोगन्धपुष्पाक्षतफलवस्त्रादिभिः

---

* संग्रहे । एवं यथोचितं शक्त्या हुत्वा पूर्णाहुतिञ्चरेत् । घृतेनापूर्यस्रुग्गर्त-मूर्ध्ववक्त्रस्रुचिस्रुवम् । निधायाधोमुखंन्यस्य स्रुवाग्रे कुसुमाक्षतम् । पश्चाद्धामंपुरोदक्षकराभ्यां शंखमुद्रया । गृहीत्वा स्रुक्स्रुवौ मन्त्रीस्रुवाग्रन्यस्तलोचनः । ऋजुकायःप्रसन्नात्मासमपादः समुत्थितः । स्थिरधोर्जुहुयादग्नौ यवप्रमितधारया । पूर्णाहुतिरियं प्रोक्तासर्वकर्मप्रपूरणी । इति । ग्रहशांत्यादावेव पूर्णाहुति होमो ननु संस्कारादौ तथैव हरिहरादिनां गृह्यसूत्रे व्याख्यानात् ॥

स्रुवं संपूजयेत् स्रुचश्चमे इति ॥ ओं स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे धिषवणे च मे पूतभृच्च मेऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मे वभृथश्च्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥ ततः पूर्णापात्रम् ॥ रौप्यं ताम्रं मृण्मयं वा यत्संभवं फलवस्त्रद्रव्यसहितं तण्डुलंषट्पञ्चाशदधिकद्विशतमुष्टिपरिमितं ॥ पूर्णादर्वीत्रितपूर्णापात्रब्रह्माणंचापि त्रिः संपूज्य ॥ पूर्णा

दाव्व परापत सुपूर्णा पुनरापत वष्णेवव्विकी-
णावहाऽइषमूर्ज्जठ० शतक्रतो ॥ ओं अद्येहेत्या
द्यस्मिन्नमुककर्माङ्गभूतहोमकर्माणि कृताकृता
वेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजाप-
तिदैवतंयथानामगोत्रायययथानाम शर्मणेब्राह्मणा-
य तुभ्यमहंसंप्रददे ॥ स्वस्तीतिप्रतिवचनं ॥ ततः
प्रणीताविमोकः ॥ ॐ सुमित्रियानऽआपऽओ
षधयः सन्तु ॥ इतिमंत्रेण पवित्राभ्यां प्रणीतोद
केनकर्तुः शिरसि संमृज्य ॥ ॐ दुर्म्मित्रियास्त

स्मै सन्तु योस्मान्द्वोष्टि यञ्चव्वयन्द्विष्मः॥इति मंत्रेणोशान्यां प्रणीता पात्रं न्युब्जीकुर्यात्॥ तत आस्तरणक्रमेणैव बर्हिरुत्थाप्य आज्येनाऽभिघार्य देवागात्वित्यादिपठित्वा हस्तेनैव होमयत्॥ ॐ देवगातुविद इत्यस्य मनसस्पतिऋषिर्विराट्छंदो वातोदेवता बर्हिहोम विनियोगः॥ ॐ दैवगातु विदोगातुं वित्वागातुमित॥ मनसस्पत ऽइमन्देव यज्ञर्ठ० स्वाहा वाते धा॥ इतिबर्हि होमः। ततोमहाबलिः॥ माषतंडुलाद्य

न्न कुंकुमादिगन्धरक्तपुष्पादियुतं सदीपं सवस्त्र
सदक्षिणं सजलं क्षेत्रपालाय दद्यात् ॥ तत्रमं
त्रः ॥ क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशा-
किनीडाकिनीवेतालादिपरिवारयुताय इमं ब-
लिं समर्प्पयामि भो भो क्षेत्रपाल इमं बलिं
गृहाण मम यजमानस्यायुः कर्ता क्षेमकर्ता
वरदस्तुष्टिदो भव ॥ इति पठित्वा बलिं शू-
द्रेण ब्राह्मणेन वा चतुष्पथे विसर्जयते ॥ तत
आचार्यः प्रक्षालितपाणिपाद आचामेत् ॥

अथमेधाकरणम् ॥ होता अद्येत्यादिकृतस्या
ऽमुककर्मणा होमादिकर्मणः परिपूर्णतासिद्ध्य
र्थंपूर्णाहुति होमायिष्ये ॥ इतिसङ्कल्प्य ॥ घृतपूर्ण
स्रुवे नारिकेलपुंगीफलादिफलचन्दनपुष्पाणि
निधाय घृतधारया सहहोमये दोभिर्मन्त्रैः ॥ ॐ
सदसस्पतिमद्भुतम्प्रियमिन्द्रस्य काम्यम् ॥
सनिम्मेधा मया सिषर्ठ० स्वाहा ॥१॥ ॐ या
म्मेधान्देवगणाः पितरश्चोपासते ॥ तया मा-
मद्य मेधयाग्ने मेधाविनङ् कुरु स्वाहा ॥२॥ ॐ

मेधाम्मे व्वरुणो ददातु मेधामग्निः प्रजापतिः॥
मेधामिन्द्रश्च व्वायुश्च मेधान्धाता ददातु मे
स्वाहा ॥ ३॥ ॐ पूर्णा दर्व्वि परापत सूपुर्णा
पुनरापत व्वष्णे व विक्रीणावहा ऽइषमूर्ज्ज-
ठ० शतक्रतो॥३॥ ओं इदम्मे ब्रह्मच क्षत्रञ्चो
मे श्रियमश्नुताम्॥ मायि देवा दधताश्रियमुत्तमा
न्तस्यै ते स्वाहा॥७॥ ततो यजमानः सपरिवारो
बन्धुवर्गैः सहघृताक्तवस्त्रचन्दनपुष्पफलचवा
दिभिरग्निं संपूजयेदेनिर्मन्त्रः॥ ॐ एधोस्येधिषी

महि समिदसि तेजोसि तेजो मयि धेहि॥ समाव
वर्ती पृथिवीसमुषाः समुसूर्य्यः समुव्विष्श्वमिदं
जगत्। व्वैश्श्वानरज्ज्योतिर्भूयासं विभून्कामान्
व्यश्नवै भूः स्वाहा॥ ततः शेषचरुहोमः॥१॥ ओं
अव्म्यादधामिसमिधम् ये व्रतपतेत्वयि॥ व्रतञ्च
श्रद्धाञ्चोपैमीन्धे त्वा दीक्षितो ऽअहं॥२॥ ओं य
त्र ब्रह्म च क्षत्रञ्च सम्म्यञ्चौचरतः सह॥ तँल्लो-
कम्पुण्यम्प्रज्ञेषं यत्रदेवाः सहाग्निना॥३॥ ॐ
यत्रेन्द्रश्चव्वायुश्च सम्यंचौचरतःसह॥ तँल्लोकं

पुण्यं प्रज्ञेष यत्रसेदिर्न्नविद्यते स्वाहा इति ॥४॥
ततो यजमानोऽग्नेः पश्चिमभागे प्राङ्मुख उप
विश्य उदङ्मुखेभ्य आचार्यऋत्विगादिभ्यो द-
क्षिणां दद्यात् ॥ अथ गोदानम् ॥ गोपूजनमंत्रः ॥
ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव
च ॥ नयो ब्रह्म सुताभ्यश्च पवित्राभ्यो नमो नमः
॥१॥ ॐ इरावती धेनुमतीहि भूतर्ठ० सूयवसिनी
मनवे दशस्या । व्व्यस्कव्म्नारोदसी विष्णवे
ते दाधर्त्थ पृथिवी मभितो मयूखैः ॥ इति मन्त्रद्व

येन गांत्रिः संपूज्य ॥ ओं आकृष्णेन रजसा व-
र्तमानो निवेशयन्नमृतं मर्त्यञ्च ॥ हिरण्ययेन
सविता रथेना देवो याति भूवनानि पश्यन् ॥ इति
मंत्रेण ब्राह्मणं त्रिः संपूज्य कुशजलेनगामभ्यु
क्ष्य गोपुच्छ गृहीत्वा स्वशिरस्यभिषिञ्चदनेन
मन्त्रेण ॥ ओं नमो मे तर्त्पयत व्वाचं मे तर्प्पयत
प्राणम्मे तर्प्पयत चक्षुर्मे तर्पयत श्रोत्रम्मे तर्प-
यतात्मानम्मे तर्पयत प्रजाम्मे तर्प्पयत पशून्मे
तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन् ॥

ततः कुशादिसाहितंगोपुच्छमादाय ॥ ॐ तत्स
द्विष्णुः ३ इत्यादिदेशकालौस्मृत्वाऽमुकगोत्रो
ऽमुकशर्माऽहं मयाऽद्यकृतैत दस्मिन्कर्मणि तदं
गत्वेन यथालब्धोपचारैः कृतस्मपूजनहवनकर्म
णोः यथोक्तफलप्राप्ति पूर्वकामुकदेवताप्रीतये
इमां गां रुद्रदैवत्यामित्या दियोजयेत् ॥ ततः प्रा
र्थना ॥ ओं कपिले सर्वदेवानाम्पूजनीयासि रो-
हिणी ॥ सर्वदेवमयी यस्मादतः शान्ति प्रयच्छ
मे ॥ ततो दानप्रतिष्ठार्थं द्रव्यं कुशादिसाहितप्रा-

दाय ॥ ओं अद्यकृतैतद्गोदानप्रतिष्ठार्थमिदं द्रव्यं इत्यादिवाक्यं योजयेत् । ब्राह्मणः ओंस्वस्तीत्युच्चारयन्गृहीत्वा ॥ ओंकोदात्कस्माऽअदात्कामोदात्कामायादात् ॥ कामो दाता कामः प्रतिग्रहीता कामैतत्ते । इतिपठेत् ॥ ततोभूयसीदक्षिणादानम् ॥ ॐ हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्य फलदमतः शान्तिं प्रयच्छमे ॥ इति देय ब्राह्मणान् त्रिः संपूज्य ॥ कुशादि सहितद्रव्य

मंदाय ॥ ओं तत्सद्विष्णुः ३ इत्यादिदेशकाला
द्युच्चार्याऽमुकगोत्रोऽमुकशर्मा हं कृतस्यामुकंक-
र्मणोन्यूनातिरिक्तपरिपूर्णार्थं यथोक्तफलप्रा-
प्त्यर्थं च इदं द्रव्यं सुवर्णं रौप्यं ताम्रं वाऽ
मुकदैवतं नाना नामगोत्रभ्यो नानानामशर्म-
भ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथायोग्य
भागं विभज्य दातुमहमुत्सजे ॥ अथ सिद्धा-
न्नदानम् ॥ ओं अद्येहामुकगोत्राऽमुकशर्मा
हं कृतस्यामुककर्मणो यथाव त्फल प्राप्त

ये नानानामगोत्रान् नानानाम शर्मणो ब्रा-
ह्मणान् यथोपपन्नने भोजायिष्ये । वा
(आमान्नपक्षे) सन्तोषयिष्ये ॥ ततः स्रुवे-
ण भस्मकिंचिद् गृहीत्वाऽवाशिष्टाज्ये पिष्टवा
तात्तिलकं संस्पृश्याऽभिमन्त्रयेदनेन मन्त्रेण ॥
ओं अ नये गायत्राय त्रिवृते रथन्तराया
ष्टाकपाल ऽइंद्राय त्रैष्टुभाय पञ्चदशाय वा-
र्हतायैकादशकपालो विश्वेभ्योदेवेभ्यो जागते
वभ्यः सप्तदशेभ्यो वैरू पेभ्यो द्वादशकपालो

मित्रारुणाभ्यामनुष्टुभाभ्यामेकविंठ० शा-
भ्यां वैराजाभ्यां पयस्याबृहस्पतये पाङ्क्ता
य त्रैत्रिणवाय शाक्वराय चरुः सवित्रऽओ
ष्णिहाय त्रयस्त्रिंठ० शाय रैवताय द्वादशक
पालःप्रजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुर
ग्नये वैश्वानराय द्वादशकपालोनुमत्याऽअष्टा
कपालः ॥ १ ॥ ततो होता यजमानाय तिलकं
कुर्यात् ॥ ओं त्र्यायुषञ्जमदग्ने इतिललाटे ॥
ओं कश्यपस्यत्र्यायुषम् । इति ग्रीवायाम् ॥ ओं

यद्देवेषुत्र्यायुषमिति दक्षिणबाहुमूले । तन्नोऽअ
स्तु त्र्यायुषम् इतिहृदि ॥ तयोयजमानोघृतच्छा
यांनिरीक्ष्य तंब्राह्मणादद्यात् । तत्रक्रमः ॥ पा
त्रं रौप्यं काश्यं ताम्रं वा तत्रघृतं दूर्वा द्रव्यंनिधाय
तेजोसीत्यादिपठन् छायां निरीक्षेत् ॥ ॐ तेजो
सीति परमेष्ठीऋषिर्गायत्रीछन्द आज्यंदेवता
आज्यावेक्षणे विनियोगः ॥ ओं तेजोसि शुक्रम
मृतमायुष्पाऽआयुर्म्मे पाहि ॥ देवस्य त्वा सवि
तुः प्रसवे श्विनो र्ब्बाहुभ्याम्पूष्णो हस्तभ्या

मीददे ॥ १ ॥ ओं ध्रुवासि ध्रुवोयं यजमानोऽस्मिन्न
न्नाय तने प्रद्यापशुभिर्भूयात् ॥ घृतेनद्यावापृ
थिवी पूर्य्येथामिन्द्रस्य च्छदिरसिविश्वजनस्य
च्छाया ॥२॥ तत आज्यंस्पृष्ट्वां इति पठेत् ॥
ओं अलक्ष्मीर्यच्चदौस्थ्यम्मे सर्वगात्रेष्ववस्थि
तम् ॥ तत्सर्वं शमयाज्यत्वं लक्ष्मीं पुष्टिञ्च वर्द्ध
य ॥१॥ ओं आज्यं तेजः समुदिष्टमाज्यं पाप
हरं शुभम् ॥ आज्यं सुराणामहारमाज्ये लोकाः
प्रतिष्ठिता· ॥ २ ॥ ओं नामान्तरिक्षदिव्य

वा यन्मे किल्विषमातम् ॥ सर्वं तदाज्यसं
स्पर्शात् प्रणाशमुपगच्छतु ॥ ३ ॥ इति ॥ ततो
दूर्वांस्पृष्ट्वा इति पठेत् ॥ ओं काण्डात्
काण्डात्प्ररो हन्तीपरुषः परुषस्परि ॥ एवा
नोदूर्वेमप्रतनु सहस्त्रेण शतेन च ॥१॥ ओं या
क्षीरसागरोत्पन्ना दूर्वा पीयूषसम्भवा ॥ नत्सं
स्पर्शनमात्रेण ह्यायुर्वृद्धिर्यशोबलम् । इति ॥२॥
ततः कुशातिव्वज्जलानि तदाज्यपात्रञ्चादाय ओं
अद्येहेत्यादि मम दुःस्वप्नदुर्निमित्तादिसर्वारि

ष्टाशमनपूर्वकं तेजप्रज्ञाशौर्ययशोबलायुर्ल
क्ष्मीपुष्टिवर्द्धनार्थमिदमाज्यं मृत्युभयदैवतं
रौप्यं वा कांश्यं पात्रं चन्द्रदैवतं ताम्रपात्रं
वायूर्यदैवतममुकगोत्रायत्यादि ॥ ततः कर्तास्व
वर्गैः सहयज्ञे पुष्पाक्षतान्याक्षिप्यः प्रदक्षिणं
कुर्यात् यानि कानि० । इति मन्त्रेण ॥ ॐ यानि
कानि च पापानि जन्मान्तरकृतानि च ॥ तानि
तानि प्रणश्यन्तु प्रदक्षिण पदेपदे॥ १॥ ततःकर्त्ता
आचार्योवा ॥ 'ॐ उत्तिष्ठब्रह्मस्पते' इतिब्रह्मा

णां पुष्पाक्षतैः संपूज्य विसर्जयेत् ॥ ॐ इतिष्ठ ब्रह्मणस्पते देवषन्तस्त्वेमहे ॥ उपप्रयन्तु मरुतः सुदानवऽइन्द्रप्राशूर्भवा सचा ॥ १ ॥ ओंया न्तुदेवगणाः सर्वे पूजामादाय मामिकाम् ॥ इष्टकाम प्रसिद्ध्यर्थं पुनरागमनाय च ॥ इतिपठित्वा पुष्पाक्षतैः पीठदेवतां विसर्जयेत् ॥ ततआचार्यदयोब्राह्मणा ऐशान्यां स्थापितशान्तिकलशजलेन मंगल गीतवाद्यादिपुरः सरं यजमानस्य मङ्गलाभिषेकं कुर्युः ॥ तत्रपुराणोक्ता वेदोक्त म

न्प्राः ॥ [illegible]रास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहे
श्वराः ॥ वासुदेवो जगन्नाथस्तथासंकर्षणो विभूः
॥४॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयायते ॥
आखण्डलोऽग्गिर्भवान् यमो वै निर्ऋतिस्तथा
॥ २ ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा
शिवः ॥ ब्रह्मणासहितः शेषो दिक्पालाः पान्तु
ते सदा ॥३॥ कीर्तिर्लक्ष्मीर्घृतिर्मेधा पुष्टिःश्रद्धा
क्रिया मतिः ॥ बुद्धिर्लज्जावपुः शान्तिस्तुष्टिः का-
न्तिश्च मातरः ॥ ४ ॥ एतास्त्वामभिषिञ्चन्तु देव

पत्न्यः समागताः ॥ आदित्यश्चन्द्रमा भौमो
बुधो जीवसितार्कजाः ॥५॥ ग्रहास्त्वामभिषिञ्च
न्तु राहुकेतुश्च तर्पिताः ॥ देव दानवगन्धर्वा यक्ष
राक्षसपन्नगाः ॥६॥ ऋषयो मनवो गावो देव
मातर एवच ॥ देवपत्न्यो द्रुमानागा दैत्याश्चाऽ
प्सरसांगणाः ॥ ७ ॥ अस्त्राणि सर्वशस्त्राणि
राजानो वाहनानि च ॥ औषधानि च रत्नानि
कालस्याऽवयवाश्च ये ॥ ८ ॥ सरितः सागराः
सर्वतीर्थानि जलदा नदाः ॥ एते त्वामभिषि